श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४५

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४५

*बालक्रीडावर्णनम्*

अयि सबल मुरारे पाणिजानुप्रचारैः
 किमपि भवनभागान् भूषयन्तौ भवन्तौ।
चलितचरणकञ्जौ मञ्जुमञ्जीरशिञ्जा-
 श्रवणकुतुकभाजौ चेरतुश्चारुवेगात्॥ १ ॥

मृदु मृदु विहसन्तावुन्मिषद्दन्तवन्तौ
 वदनपतितकेशौ दृश्यपादाब्जदेशौ।
भुजगळितकरान्तव्यालगत् कङ्कणाङ्कौ
 मतिमहरतमुच्चैः पश्यतां विश्वनृणाम्॥ २ ॥

अनुसरति जनौघे कौतुकव्याकुलाक्षे
 किमपि कृतनिनादं व्याहसन्तौ द्रवन्तौ।
वलितवदनपद्मं पृष्ठतो दत्तदृष्टी
 किमिव न विदधाथे कौतुकं वासुदेव॥ ३ ॥

द्रुतगतिषु पतन्तावुत्थितौ लिप्तपङ्कौ
 दिवि मुनिभिरपङ्कैः सस्मितं वन्द्यमानौ।
द्रुतमथ जननीभ्यां सानुकम्पं गृहीतौ
 मुहुरपि परिरब्धौ द्राग्युवां चुम्बितौ च॥ ४ ॥

स्नुतकुचभरमङ्के धारयन्ती भवन्तं
 तरळमति यशोदा स्तन्यदा धन्यधन्या।
कपटपशुप मध्ये मुग्धहासाङ्कुरं ते
 दशनमुकुळहृद्यं वीक्ष्य वक्त्रं जहर्ष॥ ५ ॥

तदनु चरणचारी दारकैस्साकमारा-
    न्निलयततिषु खेलन् बालचापल्यशाली।
भवनशुकविलाळान् वत्सकांश्चानुधावन्
    कथमपि कृतहासैर्गोपकैर्वारितोऽभूः॥ ६॥

हलधरसहितस्त्वं यत्र यत्रोपयातो
    विवशपतितनेत्रास्तत्र तत्रैव गोप्यः।
विगळितगृहकृत्या विस्मृतापत्यभृत्या
    मुरहर मुहुरत्यन्ताकुला नित्यमासन्॥ ७॥

प्रतिनवनवनीतं गोपिकादत्तमिच्छन्
    कळपदमुपगायन् कोमळं क्वापि नृत्यन्।
सदययुवतिलोकैरर्पितं सर्पिरश्नन्
    क्वचन नवविपक्वं दुग्धमप्यापिबस्त्वम्॥ ८॥

मम खलु बलिगेहे याचनं जातमास्ता-
    मिह पुनरबलानामग्रतो नैव कुर्वे।
इति विहितमतिः किं देव सन्त्यज्य याच्ञां
    दधिघृतमहरस्त्वं चारुणा चोरणेन॥ ९॥

तव दधिघृतमोषे घोषयोषाजनाना-
    मभजत हृदि रोषो नावकाशं न शोकः।
हृदयमपि मुषित्वा हर्षसिन्धौ न्यधास्त्वं
    स मम शमय रोगान् वातगेहाधिनाथ॥ १०॥

शाखाग्रेऽथ विधुं विलोक्य फलमित्यं बालं च तातं मुहुः
    संप्रार्थ्याथ तदा तदीय वचसा प्रोत्क्षिप्त बाहौ त्वयि।
चित्रं देव शशी स ते करमगात् किं ब्रूमहे सम्पत-
    ज्ज्योतिर्मण्डलपूरिताखिलवपुः प्रागा विराड्रूपताम्॥ ११॥

किं किं बतेदमिति संभ्रम भाजमेनं
    ब्रह्मार्णवे क्षणममुं परिमज्ज्य तातम्।

मायां पुनस्तनयमोहमयीं वितन्व-
    न्नानन्दचिन्मय जगन्मय पाहि रोगात्॥ १२॥

——— ********** ———